# ॥ श्रीशिवस्तुती लङ्केश्वरकृत ॥

.. Shivastuti by Lankeshvara Ravana ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : shivastutiH laNkeshvaravirachitA
File name : shivastutilankeshvara.itx
Location : doc_shiva
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Latest update : April 7, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीशिवस्तुती लङ्केश्वरकृत ॥

श्रीगणेशाय नमः ।
गले कलितकालिमः प्रकटितेन्दुभालस्थले विनाटितजटोत्करं रुचिरपाणिपाथो-रुहे ।
उदञ्चितकपालकं जघनसीम्नि सन्दर्शितद्विपाजिनमनुक्षणं किमपि धाम वन्दामहे ॥ १॥

वृषोपरि परिस्फुरद्धवलधामधामश्रियां कुबेरगिरिगौरिमप्रभवगर्वनिर्वासि तत् ।
क्वचित्पुनरुमाकुचोपचितकुङ्कुमै रञ्जितं गजाजिनविराजितं वृजिनभङ्गबीजं भजे ॥ २॥

उदित्वरविलोचनत्रयविसृत्वरज्योतिषा कलाकरकलाकरव्यतिकरेण चाहर्निशम् ।
विकासितजटाटवीविहरणोत्सवप्रोल्लसत्तरामरतरङ्गिणीतरलचूडमीडे मृडम् ॥ ३॥

विहाय कमलालयाविलसितानि विद्युन्नटीविडम्बनपटूनि मे विहरणं विधत्तां मनः ।
कपर्दिनि कुमुद्वतीरमणखण्डचूडामणौ कटीतटपटीभवत्करटिचर्मणि ब्रह्मणि ॥ ४॥

भवद्भवनदेहलीविकटतुण्डदण्डाहतित्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते ।
व्रजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसम्पदः प्रमथनाथ नाथा-महे ॥ ५॥

त्वदर्चनपरायणप्रमथकन्यकालुण्ठितप्रसूनसफलद्रुमं कमपि शैलमाशास्महे ।
अलं तटवितर्दिकाशयितसिद्धिसीमन्तिनीप्रकीर्णसुमनोमनोरमणमेरुणामेरुणा ॥ ६॥

न जातु हर यातु मे विषयदुर्विलासं मनोमनोभवकथास्तु मे न च मनोरथातिथ्य-भूः ।
स्फुरत्सुरतरङ्गिणीतटकुटीरकोटौ वसन्नये शिव दिवानिशं तव भवानि पूजापरः ॥ ७॥

विभूषणसुरापगाशुचितरालवालावलीवलद्वहलसीकरप्रकरसेकसंवर्धिता ।
महेश्वरसुरद्रुमस्फुरितसज्जटामञ्जरी नमज्जनफलप्रदा मम नु हन्त भूयादियम् ॥ ८॥

बहिर्विषयसङ्गतिप्रतिनिवर्तिताक्षावलेः समाधिकलितात्मनः पशुपतेरशेषात्मनः ।

शिरःसुरसरित्तटीकुटिलकल्पकल्पद्रुमं निशाकरकलामहं बटुविमृश्यमानां भजे ॥ ९॥

त्वदीयसुरवाहिनीविमलवारिधारावलज्जटागहनगाहिनी मतिरियं मम क्रामतु ।
उपोत्तमसरित्तटीविटपिताटवी प्रोल्लसत्तपस्विपरिषत्तुलाममलमल्लिकाभ प्रभो ॥ १०॥

इति श्रीलङ्केश्वरविरचिता शिवस्तुतिः समाप्ता ॥

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. Shivastuti by Lankeshvara Ravana ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*